नं० ७६०-च

चन्द्रालोक

अर्थालंकाराः
पत्राणि ६
नं० ७६०-च

६ पत्र

नं. ७६० नग ?

अर्थालंकाराः १५ पत्र. ६

[illegible]

लि. सं. १८ [illegible]

॥ॐ नमो गणपतये॥ अथार्थालंकाराः। उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः। हंसीव कृष्ण ते कीर्त्तिः स्वर्गगामवगाहते। १। अत्र हंसी कीर्त्तिः स्वर्गगावगाह
नमिव शब्दश्चेत्युपमानोपमेयसाधारणधर्मोपमावाचका [illegible] नां चतुर्णामप्युपादाना त्पूर्णोपमा। । वर्ण्योपमानधर्माणामुपमावाचक
स्य च। एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा। २। वाचकलुप्ता १ धर्मलुप्ता २ ध[illegible]र्मवाचकलु ३ वाचकोपमेयलु ४ वाचकोपमानलु ५ उपमान
लुप्ता ६ धर्मोपमानलु ७ धर्मोपमानवाचकलुप्ता ८। तत्र क्रमेणोदाहरणं। तडिद्गौरीन्दुतुल्यास्याः कर्पूरं ती दृशो मम। कान्तात्मरवधूयन्ती दृष्टा तन्वीरहो
मया। ३। यत्तयामेलनं तत्र लाभो मे यश्च तद्रतेः। तदेतत्काकतालीयमवितर्कितसंभवं। ४। अत्र तडिदिव गौरी तावत्प्रादेस्य समासे लोपाद्वाचकलुप्ता।
१। कोसेन्दुतुल्यास्येति वक्तव्ये तदग्रहणाद्धर्मलुप्ता। २। कर्पूरमिवाचरंतीत्याचारार्थकक्विप्प्रत्ययशब्देन सह लोपान्नयनयोरानंदात्मकतया कर्पूरं तीति धर्म
ग्रहाच्च धर्मवाचकलुप्ता। ३। स्वात्मानं स्मरवधूमिवाचरंतीति स्वात्मनउपमेयस्य सहोपमावाचकेनानुपादानाद्वाचकोपमेयलुप्ता। ४। काकतालीयमित्य
त्र काकतालशब्दौ तत्समवेतक्रियावाचिनौ तेन काकागमनमिव तालपतनमिव काकतालं। उभयत्रोपमेयं स्वस्य कचिदगमनं तत्रैव रहसि त[illegible]न्याश्च
वस्थानं तेन स्वस्य तयामेलनं काकतालसमागमसममिति फलितं अत्रोपमानस्य काकतालसमागमस्य वाचकस्य चेवशब्दस्याग्रहणादुपमेयस्य
मेलनस्या वितर्कितसंभवत्वस्य च धर्मस्य ग्रहणाद्वाचकोपमानलुप्ता। ५। पुनः काकतालमिव काकतालीयमिति द्वितीयस्मिन्नि वार्थे समासे समासाच्च त
द्विषयादिति छः॥ तथा च पतनदलितं तालफलं यथा काकेनोपभुक्तं तथा रहोरूपनि कुञ्जमितहृदयासामयोपभुक्तेत्यर्थः। फलति अत्राप्यवितर्कितसंभवत्व
स्य धर्मस्य रतिलाभस्य चोपमेयस्येयादेशरूपस्य च श्रूयमाणत्वात्काककृततालफलोपभोगरूपस्य चोपमानस्याग्रहणादुपमानलुप्ता। ६। अवितर्कितसं
भवमिति धर्मानुपादाने पंचम्येव धर्मोपमानवाचकलुप्ता। ७। षष्ठी च धर्मोपमानलुप्ता संपद्यत इति स्वस्वदृशा बोध्यं। ८। ।उपमानोपमेयत्वं यदेकस्यैव वस्तु
नः। इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः। ५। अत्र स्वस्य स्वेन सादृश्यासंभवादन्यसादृश्याभावद्योतनद्वारा निरुपमत्वे तात्पर्यं। पर्यायेण द्वयोस्तच्चे
दुपमेयोपमानता। धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि। ६। प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं। त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः। ७। अन्योपमेय
लाभेन वर्ण्यस्यानादरश्च तत्। अलं गर्वेण ते वक्त्र कान्त्या चन्द्रोपि तादृशः। ८। वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः। कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संति
हि स्त्रियः। ९। वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्। मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलाम्बुजं। १०। प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते।
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना। ११। विषय्यभेदताद्रूप्यरंजनं विषयस्य यत्। रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः। १२। विषयस्यो
पमेयस्य विषयिणोपमानेनाभेदेन ताद्रूप्येण वा रंजनं रूपवत्करणं तद्रूपकं एवं रूपकं द्विविधं अभेदरूपकं ताद्रूप्यरूपकं च तत्र प्रत्येकं त्रिविधं प्रसि

द्विषयिणोऽर्थाधिक्योक्त्यान्यूनतोक्त्यानुभयोक्त्या चेति । तत्रोद्देशक्रमवैपरीत्येनोदाहरणानि । अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् ।
अयमास्ते विना शंभुस्तार्तीयीकं विलोचनं । शंभुर्विश्वमवत्वद्य स्वीकृत्य समदृष्टितां ॥ इत्यभेदरूपकाणि । अथ ताद्रूप्यरूपकं । अस्या मुखेन्दुनानेन
आनंदे किमिंदुना । साध्वीयमपरा लक्ष्मीरसुधासागरोदिता । अयं कलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते ॥ १५ ॥ परिणामः क्रियार्थश्चेद्विषयी वि
षयात्मना । प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥ १६ ॥ अत्र मयूरव्यंसकादिसमासाश्रयणेनोत्तरपदप्राधान्याद् दृगब्जस्य वीक्षणोपयोगित्वेनि
वर्द्धं तच्च दृगात्मतापत्तिमंतरा न संभवतीति परिणामः । बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते । स्त्रीभिः कामोर्थिभिः स्वर्द्रुः कालः शत्रुभिरे
क्षि सः ॥ १७ ॥ एकेन बहुधोल्लेखेप्यसौ विषयभेदतः । गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने ॥ १८ ॥ स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालंकृतित्र
यं । पंकजं पश्यतः कांतामुखं मे गाहते मनः ॥ १९ ॥ अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पंकजं । पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ॥ २० ॥ शु
द्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः । नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं ॥ २१ ॥ स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः । नेंदुस्तीव्रो न
निश्यर्कः सिंधोरौ[illegible]र्वेयमुत्थितः ॥ २२ ॥ अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः । नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं ॥ २३ ॥ भ्रांता
पह्नुतिरन्यस्य शंकायां भ्रांतिवारणे । तापं करोति सोत्कंपं ज्वरः किं न सखि स्मरः ॥ २४ ॥ छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे । प्रजल्पन्
मत्पदे लग्नः कांतः किं न हि नूपुरः ॥ २५ ॥ कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः । निर्यांति स्मरनाराचाः कांतादृक्पातकैतवात् ॥ २६ ॥ संभा
वना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे ॥ २७ ॥ अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यात्मतासंभाव
नमुत्प्रेक्षा । सा त्रिधा कस्यचिद्वस्तुनो वस्त्वंतरात्मनासंभावनं वस्तूत्प्रेक्षा । सैव स्वरूपोत्प्रेक्षा । अहेतोर्हेतुतया संभावनं हेतूत्प्रेक्षा । अफ
लस्य फलतया संभावनं फलोत्प्रेक्षा । तत्राद्या वस्तूत्प्रेक्षा द्विधा उक्तविषयानुक्तविषया चेति परे हेतुफलोत्प्रेक्षे अपि प्रत्येकं द्विविधे सिद्ध
विषये असिद्धविषये चेति । तत्रोदाहरणं क्रमात् । धूमस्तोमं तमः शंके कोकीविरहशुष्मणां । लिंपतीव तमोंगानि वर्षतीवांजनं नभः ॥ २८ ॥
अत्र प्रदोषविसृत्वरतमस्तोमे स्वदृष्टिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन सद्यः प्रियविघातं तत्सर्वदेशास्य कोकांग
नाहृदंतप्रज्वलितप्रच्छिरहानलधूमस्तोमत्वसंभावनं स्वरूपोत्प्रेक्षा तमसो विषयस्योपादानादुक्तविषया । तमो व्यापनस्य चराचरगता
खिलवस्तुसांद्रमलिनीकरणेन निमित्तेन तमःकर्तृकलेपनतादात्म्योत्प्रेक्षा नभःकर्तृकांजनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविष
यावस्तूत्प्रेक्षा । रक्तं तवांघ्रियुगलं भुवि विक्षेपणाद्ध्रुवं । त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ॥ २९ ॥ चरणयोः सहजे रागे विक्षेपणे

महेतुर्हेतुत्वेन संभावितमिति हेतूत्प्रेक्षेत्यावित्तेपराग्रस्य च विषयस्य सत्त्वात्सिद्धविषया। चंद्रपद्माविरोधे सहजे कांतामुखकांतिकामनाऽहेतु
रसती च हेतुत्वेन संभाविते त्यसिद्धविषया हेतूत्प्रेक्षा। ।मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः। प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्य
ति। २०। अत्रेत्स्वाभाविक्या मध्यकर्तृककुचधृतेः कनकदामबद्धत्वेनाध्यवसितवलित्रयशालितां फलत्वोत्प्रेक्षणं सिद्धविषया फलोत्प्रेक्षा
जलजस्य जले निजावस्थितेरुदवासतपस्त्वेनाध्यवसितायाः कांतापदसायुज्यप्राप्तिर्न फलमिति स्वपुष्पायमानायास्तस्याः फलत्वेनोत्प्रे
क्षणमसिद्धविषया फलोत्प्रेक्षा। ।रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः। पश्य नीलोत्पलद्वंद्वान्निःसरंति शिताः शराः। २१। विषयस्य
विषयिवाचकेनैव ग्रहणं निगरणं तत्पूर्वकं विषयस्याविषयिरूपताध्यवसानं रूपकातिशयोक्तिः यथा नीलोत्पलशरशब्दाभ्यां लोचनयोः
कटाक्षाणां च निगरणपूर्वकं तद्रूपताध्यवसानं। ।यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता। त्वत्सूक्तिषु सुधा राजन् भ्रांताः पश्यंति तां विधौ।
२२। त्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिः चंद्रमंडलस्यामृतं न भवतीत्यपह्नुतिगर्भत्वं। भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनं। अ
न्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः। २३। संबंधातिशयोक्तिः स्यादयोगे योगकल्पनं। सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं। २४। योगेऽप्य
योगसंबंधातिशयोक्तिरितीर्यते। त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे। २५। अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः। आलिंग
ति समं देव ज्यां शराश्च पराश्च ते। २६। ज्या प्रत्यंचा भुवं च। चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे। यास्यामीत्युदिते तन्व्या वलयो भवदूर्मि
का। २७। संभावितविरहेण कार्श्यपवादात्। अत्यंतातिशयोक्तिस्तु तौ पौर्वापर्यव्यतिक्रमे। अग्रे मानो गतः पश्चादनुनीता प्रियेण सा। २८। एता
स्तिस्रोऽतिशयोक्तयः कार्यहेत्वाश्रया नोद्याः। ।वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता। संकुचंति सरोजानि स्वैरिणीवदनानि च। ३९। त्वदं
गमार्दवे दृष्टे कस्य चित्ते न भासते। मालतीशशभृल्लेखाकदलीनां कठोरता। ४०। प्रस्तुतानामप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयस्तुल्ययो
गिता तत्र प्रस्तुतचंद्रोदयकालीनतया वर्ण्यानां सरोजानां प्रकाशाभीकस्वैरिणीमुखानां च संकोचरूपैकक्रियावर्णनं प्रस्तुततुल्ययोगिता उत्तर
श्लोके नायिकासौकुमार्यवर्णने प्रस्तुतेऽवर्ण्यानां मालत्यादीनां काठिन्यरूपैकगुणान्वयोऽप्रस्तुततुल्ययोगिता। ।हिताहिते वृत्तितौल्यं स्यात्त २
रा तुल्ययोगिता। प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया। ४१। परोत्कर्षस्य भूतिर्विभूतिः पराभूतिः पराभवश्च। गुणोत्कृष्टैः समीकृत्य वचोऽन्या
तुल्ययोगिता। लोकपालो यमः पाशी श्रीदः शक्रो भवानपि। ४२। वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः। मदेन भाति कलभः प्रतापेन महीप
तिः। ४३। त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं। वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी। ४४। उन्मीलंति कदंबानि स्फुटंति कुटजाद्रुमाः। माद्यंति
चातकास्तृप्ता माद्यंति च शिखावलाः। ४५। दीपकस्थाने [illegible] र्थस्योभयोर्वावृत्तौ त्रिविधं दीपकं वर्षति वर्ष

मिवाचरतीत्यर्थः वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता। तापेन भ्राजते सूरः शूरश्चापेन राजते ॥४६॥ उपमानोपमेयवाक्ययोरेकः साधारणो ध
र्मः पृथङ्निर्दिश्यते चेत्तदा प्रतिवस्तूपमा। प्रतिवस्तु प्रतिवाक्यार्थमुपमासमानो धर्मोऽस्यामिति निरुक्तेः। चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः। त्वमे
व कीर्तिमान्राजन्विधुरेव हि कांतिमान् ॥४७॥ वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना। यदातुः सौम्यता सेयं पूर्णेंदोरकलंकता ॥४८॥ अत्रोपमा
नोपमेयवाक्यार्थयोर्यत्तच्छब्दाभ्यामैक्यारोपः। पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनां। त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुजन्मनोः ॥४९॥ अत्र नेत्रयुगले
नीलांबुजगतलीलापदार्थारोपो निदर्शना। अपरां बोधनं प्राहुः क्रियया सदसदर्थयोः। नश्येद्राजविरोधीति क्षीणं चंद्रोदये तमः ॥५०॥ उदयन्नेव स
विता पद्मेष्वर्पयति श्रियं। विभावयन्समृद्धीनां फलं सुहृदनुग्रहं ॥५१॥ व्यतिरेको विशेषश्चेदुपमानोपमेययोः। शैला इवोन्नताः संतः किंतु प्रकृति
कोमलाः ॥५२॥ सहोक्तिः सहभावश्चेद्भासते जनरंजनः। दिगंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ॥५३॥ विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमु
च्यते। विद्या हृद्यापि सावद्या विना विनयसंपदं ॥५४॥ तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते। विना खलैर्विभात्येषा राजेंद्र भवतः सभा ॥५५॥
समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्। अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः ॥५६॥ यत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाम्यव
लादप्रस्तुतवृत्तांतस्यापि परिस्फूर्तिः तत्र समासोक्तिरलंकारः। यथात्रैव चंद्रोदये वर्ण्यमाने मुखशब्दस्य प्रारंभवदनसाधारण्याद्रक्तशब्दस्यारुण
कामुकसाधारण्याच्चुंबतीत्यस्य च प्रस्तुते संवर्धमानत्वे परस्यापि शक्त्यार्थांतरवृत्तित्वाच्चंद्रशब्दगतपुल्लिंगेनैंद्रीशब्दगतस्त्रीलिंगेन च तत्पतिपादेंद्र
संबंधित्वेन चोपस्कृतात्प्रस्तुतवृत्तांतादप्रस्तुतपरवनितासक्तपुरुषवृत्तांतः प्रतीयते। अलंकारः परिकरः साभिप्राये विशेषणे। सुधांशु
कलितोत्तंसस्तापं हरतु वः शिवः ॥५७॥ साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः। चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥५८॥ नानार्थसंश्रयः श्ले
षो वर्ण्यावर्ण्योभयाश्रयः। सर्वदो माधवः पायात्स योऽगं गामदीधरत् ॥५९॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना। उच्चरद्भूरिकीलालः शुशु
भे वाहिनीपतिः ॥६०॥ प्रकृतविषयाणामप्रकृतविषयाणामुभयविषयाणां वानेकार्थशब्दानां विन्यासः श्लेषः। सर्वदेत्यादिना क्रमादुदाहरणं। त
त्राद्ये स्तुत्यत्वेनोभौ देवौ प्रकृतौ। द्वितीये कमलचंद्रावुपमानतया द्वावप्यप्रकृतौ। तृतीये सेनानीः प्रकृतो न समुद्र इति। अत्र शिवपक्षे सर्वदा
सदा। उमाधवः पार्वतीपतिः गंगां यो दधारेत्यर्थः। विष्णुपक्षे सर्वदः सर्ववरदाता माधवो लक्ष्मीपतिः यः गां पृथ्वीं वराहः सन् अगं गोवर्द्धनं च ह
सः सन्धारेत्यर्थः। अब्जेन चंद्रेण कमलेन च हरिणाहितसक्तिना मृगांकत्वात् हरिणा विष्णुनाहितासक्तिर्यत्र तेन सदा पद्मसहहस्त
त्वात्। वाहिनीपतिः सेनानीर्नदीपतिरर्णवश्च उच्चरद्भूरिकीलालः युधि शस्त्रप्रहारेणस्रवद्बहुरुधिरः तरंगमंगिभिरुच्छलद्बहुसलिलश्च ॥

कथनं पर्यायोक्तालंकारः। यथा भगवान्वासुदेवः स्वासाधारणरूपेण

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया। एकः कृती शकुंतेषु योन्यं शक्रान्न याचते।६१। यत्राप्रकृतवृत्तांतवर्णनं सारूप्यादिसंबंधेन प्रकृतार्थावग
अप्र० तिपर्यवसायि तत्राप्रस्तुतप्रशंसालंकारः इयमेवान्योक्तिरुच्यते यथात्राप्रकृतचातकप्रशंसा प्रशंसनीयत्वेन प्रस्तुते तत्सरूपे क्षुद्रयाञ्चानिवृत्ते
मानिनि पर्यवस्यति प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः। किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया।६२। यत्र वर्णितेन प्रस्तुतेनान्यदभिम
४ तं प्रस्तुतं द्योत्यते तत्र प्रस्तुतांकुरालंकारः यथात्रैव प्रियतमेन साकमुद्याने विहरंती काचित्सौंदर्याभिमानशालिनी भृंगोपालंभेन प्रस्तुतवा
र्यार्थेन क्रूरजनपरिवारदुःप्रधर्ष्यायां पराक्ष्मियां विटसर्वस्वापहरणसंकल्पदुर्लभायां वेश्यायां वा कंटकसंकुलकेतकीसमायां प्रवर्त्तमानं
3 प्रियतममुपालभते स्म। ।पर्यायोक्तं तु गम्यस्य वचोभंग्यंतर[illegible]राश्रयं नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ।६३। गम्यस्य
विवक्षितस्य भंग्यंतरेण विवक्षितरूपादपि चारुतरेण केनचिद्रूपेण विवक्षितोपि राहुवधूकुचवैयर्थ्यकर्तृत्वेन रूपांतरेणाभिहितः। ।प
र्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं। यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह।६४। अत्र नायिकया नायकसंयोजनचूतलतादर्शनव्याजे
न निर्गच्छंत्या सख्या तत्स्वाघंघरूपेष्टसाधनं पर्यायोक्तं। ।उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः। कः स्वर्धुनि विवेकस्ते पापिनो नय
से दिवं।६५। साधु दूति पुनः साधु कर्त्तव्यं किमतः परं। यन्मदर्थं विलूनासि दंतैरपि नखैरपि।६६। निंदयास्तुतेः स्तुत्या वा निंदाया वचनं व्याज
स्तुतिः उदाहरणे यथा गंगायाः विवेको नास्तीति निंदाव्याजेन सुकृतवत्यापि नापि दिवं नयसीति स्तुतिस्तत्प्रभाववर्णनार्था। दूत्याश्च स्तु
तिव्याजेन मदर्थं गतासि किं तु रंतुमेवेति धिक्कां दूतीधर्मविरुद्धकारिणीमिति निंदा। निंदायां निंदया व्यक्तिर्व्याजनिंदेति गीयते। विधेस
=न्वर निंदायस्तेऽपागेकमेवाहरच्छिरः।६७। हर निंदया विषमविपाकं संसारं प्रवर्त्तयतो विधेर्निंदा। आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्। चंद्र
संदर्शयात्मानमथवास्ति प्रियामुखं।६८। निषेधाभाससमाक्षेपं बुधाः केचन मन्वते। नाहं दूती त[illegible]नोस्तस्यास्तापः कालानलोपमः।६९। न नि
षेधमात्रमाक्षेपः किंतु यत्र निषेधो वाधितः सन्नर्थांतरे पर्यवस्यन्कंचिद्विशेषमाक्षिपति स आक्षेपः यथा दूत्युक्तौ नाहं दूतीति निषेधो वाधितः २
सन्नाहं मृषावादिनीति सत्यवादित्वे पर्यवस्यन्निदानीमेवागस्त्वया नायिको जीवनीयेति विशेषमाक्षिपति। आक्षेपोन्यो विधौ व्यक्ते प्र
तिषेधे तिरोहिते। गच्छ गच्छसि चेत्कांत तत्रैव स्याज्जनिर्मम।७०। अत्र गच्छेति विधिर्व्यक्तः कांत गंतव्यदेशे निजजन्मोक्त्या स्वमृतिसूचनान्मा
गा इति। निषेधस्तिरोहितः। आभासत्वे विरोधस्य विरोधाभास इष्यते। विनापि तन्वि हारेण वक्षोजौ तव हारिणौ।७१। हाररहितावपि हारिणौ
इत्यवितिश्लेषमूलको विरोधाभासः। विभावना विनापि स्यात्कारणं कार्यजन्म चेत्। अप्यलाक्षारससिक्तं रक्तं तच्चरणद्वयं।७२। रक्तिमनः(

स्वाभाविकत्वे नाविरोधः। हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता। अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः।७३। जयहेतूनामस्त्राणां तीक्ष्ण
द्विगुणवैकल्यमसमग्रत्वं। कार्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबंधके। नरेंद्रानेव ते राजन्दशत्यसिभुजंगमः।७४। नरेंद्रा विषवैद्या
पाश्च। अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना। शंखाद्वीणानिनादोयमुदेति महदद्भुतं।७५। शंखेन कंठस्य वीणानादेन च गीतस्याध्य
वसानं। विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना। शीतांशुकिरणास्तन्विं हंत तापयंति मां।७६। कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना।
यशःपयोधिरभवत्करकल्पतरोस्तव।७७। कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे। हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि।७८।
स्नेहस्तैलं रागश्च। असंभवोर्थनिष्पत्तेरसंभाव्यत्ववर्णनं। को वेद गोपशिशुकः शैलमुत्पाटयेदिति।७९। विरुद्धं भिन्नदेशत्वं कार्यहेत्वोर
संगतिः। विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः।८०। गरलं सलिलं विषं। अन्यत्र करणीयस्य ततोन्यत्र कृतिश्च सा। अन्यत्कर्तुं प्रवृत्तस्य त
द्विरुद्धस्य कृतिश्च सा।८१। अपारिजातां वसुधां चिकीर्षन्द्यां तथा कृथाः। गोत्रोद्धारप्रवृत्तोपि गोत्रोद्भेदं पुराकरोः।८२। अत्र शक्रोपालंभः कृ
ष्णं प्रति। अपारिजातामपगतशत्रुभूमां पारिजातहीनां च। गोत्राया भूमेरुद्धारः पातालादुद्धरणं गोत्राणां गिरीणामुद्भेदः खुरकुट्टनं। विषमं
वर्ण्यते यत्र घटनाननुरूपयोः। क्वेयं शिरीषमृद्वंगी क्व तावान्मदनज्वरः।८३। विरुद्धकार्यस्योत्पत्तिरपरं विषमं मतं। कीर्तिं प्रसूते धवलां
श्यामा तव कृपाणिका।८४। अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्। भक्ष्याशयाहिमंजूषां दृष्ट्वाखुस्तेन भक्षितः।८५। समं स्याद्वर्णनं
यत्र द्वयोरप्यनुरूपयोः। स्वानुरूपं कृतं सद्म हारेण कुचमंडलं।८६। सारूप्यमपि कार्यस्य कारणेन समं विदुः। नीचप्रवणता लक्ष्मि जल
जायास्तवोचिता।८७। विनानिष्टं च तत्सिद्धिर्यदर्थं कर्तुमुद्यमः। युक्तो वारणलाभोयं स्यान्न ते वारणार्थिनः।८८। राजानमिभार्थं यानुस्त
रं तद्द्वारि दौवारिकैर्वार्यमाणं प्रति नर्मवाक्यमुदाहरणं। विचित्रं तत्प्रयत्नश्चेद्विपरीतफलेच्छया। नमंति संतस्त्रैलोक्यादपि लब्धुं समुन्नतिं।
।८९। अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं। ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः।९०। पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतं। कियद्वा
ग्ब्रह्म यत्रैते विश्राम्यंति गुणास्तव।९१। अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता। मणिमालोर्मिका तेद्य करे जपवटायते।९२। अन्योन्यं
नाम यत्र स्यादुपकारः परस्परं। त्रियामा शशिना भाति शशी भाति त्रियामया।९३। विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं। गतेपि सूर्ये दी
पस्थास्तमश्छिंदंति तत्कराः।९४। विशेषः सोपि यद्येकं वस्त्वनेकत्र वर्ण्यते। अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे।९५। किंचिदारंभतोशक्य
वस्त्वंतरकृतिश्च सः। त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं।९६। स व्याघातोन्यथाकारि तथाकारि क्रियेत चेत्। यैर्जगत्प्रीयते हंति तैरेव

कु०
४
५

कुसुमायुधः।९७। सौकार्येण निबद्धापि क्रिया कार्यविरोधिनी। दयाचेद्बाल इति मय्यपरित्याज्य एव ते।९८। जैत्रयात्रोन्मुखेन राज्ञा युवराजस्य वा
लत्वं राज्यरक्षास्थापने हेतुः कृतं युवराजेन तु तदेव सहनयने हेतुः क्रियते। ।गुंफः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः। नयेन श्रीः श्रिया
त्यागस्त्यागेन विपुलं यशः।९९। गृहीतमुक्तरीत्यार्थश्रेणिरेकावलीमता। नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तम्भदोलितौ।१००। दोःस्तम्भौ जानुपर्यन्त
प्रलम्बनमनोहरौ। जानुनी रत्नमुकुराकारे तस्य महीभुजः।१। दीपकैकावलीयोगान्मालादीपकमिष्यते। स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थि
तिः।२। तेन हृदये ह्या। उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते। मधुरं मधु त[...]स्मात्सुधा तस्याः कवेर्वचः।३। यथासंख्यं क्रमेणैव क्रमिकाणां
समन्वयः। शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय।४। पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः। पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा।५। ए
कस्मिन्यद्यनेकं वा पर्यायः सोपि संमतः। अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि।६। परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः। जग्राहैकं
शरं मुक्त्वा कटाक्षान्स रिपुश्रियः।७। परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयन्त्रणं। स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवां।८। विरोधे तु
ल्यबलयोर्विकल्पालंकृतिर्यथा। सद्यः शिरांसि चापान्वा नमयन्तु महीभुजः।९। बहूनां युगपद्भावभाजां गुंफः समुच्चयः। नश्यन्ति पश्यन्ति त्रस्य
न्ति च भवद्द्विषः।१०। अहंप्राथमिकाभाजामेककार्यान्वयोपि सः। कुलं रूपं वयो विद्या धनं च मदयन्त्यमुं।११। क्रमिकैकगतानां तु गुं
फः कारकदीपकं। गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति।१२। समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः। उत्कण्ठिता च तरुणी जगामा
स्तं च भानुमान्।१३। प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः। जैत्रनेत्रानुगौ कर्णौ उत्पलाभ्यामधः कृतौ।१४। कैमुत्येनार्थसंसिद्धिः काव्यार्था
पत्तिरिष्यते। स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहां।१५। समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनं। जितोसि मन्द कन्दर्प मच्चित्तेस्ति त्रिलो
चनः।१६। उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः। हनुमानब्धिमतरद्दुष्करं किं महात्मनां।१७। गुणवद्वस्तुसंसर्गाद्याति स्वल्पो
पि गौरवं। पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते।१८। यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः। स न जिग्ये महान्तो हि दुर्धर्षाः साग
रा इव।१९। प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनं। कचाः कलिन्दजातीरतमालस्तोममेचकाः।२०। न हि तमालानां नैल्यातिशये यमुना ५
तीरजत्वं हेतुरसहेतौ तद्धेतुत्वोक्तिः प्रौढोक्तिः। संभावनं यदीत्थं स्यादित्यूहोन्यस्य सिद्धये। यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्त
व।२१। किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं। मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन्।२२। प्रस्तुते वर्ण्यवाक्यार्थप्रति
बिंबस्य वर्णनं। ललितं निर्गते नीरे सेतुमेषा चिकीर्षति।२३। प्रस्तुते धर्मिणि वर्णनीयं वाक्यार्थमनुक्त्वा तत्सदृशस्य कस्यचिद
प्रस्तुतवाक्यार्थस्य वर्णनं ललितं। यथा कयाचिद्दास्या समागततत्कालोपेक्षितप्रतिनिधाय नायकान्तरासक्तनायकानयनार्थं

सखीं प्रेषयितुकामां नायिकामुद्दिश्य सखी तथापारयति बिंबभृत् तगतजतसेतुबंधं वर्णयति स्म। उत्कंठिता यैः स्वसिद्धिर्यत्नं विनापि ह
र्षिणः तामेव ध्यायते तस्मै निस्पृहा सैव दूतिका।२४। वांछितादधिकार्थस्य संसिद्धिः प्रहर्षणं।दीपमुद्योतयेयावत्तावदभ्युदितो रविः।२५।
यत्नाद्युपायसिद्ध्यर्थात्साक्षाल्लाभः फलस्य च।निधांजनौषधीमूलं खनता साधितो निधिः।२६। चेन प्रहर्षणं संज्ञानुबंजनं।इष्यमाणविरुद्धा
र्थसंप्राप्तिस्तु विषादनं।दीपमुद्योतयेयावत्तावन्निर्वाण एव सः।२७।एकस्य गुणदोषाभ्यामुल्लासो न्यस्य तौ यदि।अपि मां पावयेत् साध्वी स्ना
त्वेतीच्छति जाह्नवी।२८।काठिन्यं कुचयोः स्रष्टुं वांछंत्यः पादपद्मयोः।विनिंदंति विधातारं तद्द्वारी ध्वरियो स्थितेः।२९।तदभाग्यं धनस्यैव य
न्नाश्रयति सज्जनं।लाभोऽयमेव भूपालसेवकानां न चेद्वधः।३०।कस्यचिद्गुणेनान्यस्य गुणो दोषेण दोषो गुणेन दोषो दोषेण गुणो वा यत्र वर्ण्य
ते स उल्लासः।तत्र द्वितीयाद्यमाद्यस्योदाहरणं द्वितीयश्लोको द्वितीयस्य तृतीयश्लोकः पूर्वोत्तरार्द्धे तृतीयचतुर्थयोः।तत्राद्ये सतीमाहात्म्य
गुणेन गंगायाः पावनत्वगुणः।राजधानीषु पलायमानारिनारीपदगतधावनपरिवर्धितमार्दव[illegible]दोषेण पदयोः काठिन्यमस्पृश्य वर्ध्य कु
चयोस्तत्स्रष्टुर्विधातुर्निंद्यत्वदोषः।सज्जनमहिमगुणेन धनस्य तदनाश्रयणं दोषः राज्ञः क्रूरतादोषेण सेवकानां वधं विना।निर्ग
मो गुणो दर्शितः।ताभ्यां तौ यदि नस्यातामवज्ञातं कृतिस्तदा।स्वस्य मेवाद्दुलभते प्रस्थं प्राप्यापि सागरं।३१।मीलितं यद्दि पद्मानिकाहानिर
मतधुतेः।३२।दोषस्याभ्यर्थनानुज्ञा तस्यैव गुणदर्शनात्।विपदः संतु नः प्राभ्व यासु संकीर्त्यते हरिः।३३।लेशस्तु।स्याद्दोषगुणयोर्गुण
दोषत्वकल्पनं।अखिलेषु विहंगेषु हंत स्वच्छंदचारिषु।शुकपंजरबंधस्ते मधुराणां गिरां फलं।३४।राज्ञो बहुमते विदुषि पुत्रे चिरं स्वरा
जधान्याः प्रवसति तद्दर्शनोत्सुकस्य गेहस्य स्यापि तुर्वचनमप्रस्तुतप्रशंसारूपं तत्राद्यार्द्धे शुके मधुरभाषित्वस्य गुणस्य पंजरबंधहे
तु तया दोषत्वं कल्पितं।सूच्यार्थस्य वचनं मुद्रा प्रकृतार्थपरैः पदैः।नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा।३५।मविपुला नाम छंदः।क्रमिकं
प्रकृतार्थानां न्यासं रत्नावलीं विदुः।चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते।३६।तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः।पद्मरागा
यते नासा मौक्तिकं ते धराधिप।३७।पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतं।हरकंठांशु नीलोऽपि शेषस्त्वद्यशसासितः।३८।सत्यपि स्यानुह
तिश्च विकृते सति वस्तुनि।दीपे निर्वासिते प्यासीत्कांचीरत्नैर्महन्महः।३९।च कारः पूर्वरूपमितिलक्ष्यानुषंगार्थः।संगतान्यगुणानंगीकृ
रमाहुरतद्गुणं।चिरं रागिणि मच्चित्ते निहितोऽपि न रज्यसि।४०।प्रकृतसिद्धस्वगुणोत्कर्षो नुगुणः परसन्निधेः।नीलोत्पलानि दधते कटाक्षै
रतिनीलतां।४१।मीलितं यदि सादृश्याद्भेद एव न लभ्यते।रसो नालक्षि लाक्षायाश्चरणे सहजारुणे।४२।सामान्यं यदि सादृश्याद्विशेषो नो
पलक्ष्यते।पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवां।४३।भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ।हिमाद्रिं त्वद्यशोमग्नं सुराः

इतरार्द्धे विहंगानामवक्तृत्वदोषस्य स्वच्छंदाचरणानुकूलतया गुणत्वं
द्वितीयार्द्धे

प्रीतेन जानते।४४। लक्षिता नुदते चंद्रे पद्मानि च मुखानि च।४५। किंचिदाकूतसहितं स्याद्गूढोत्तरमुत्तरं। यत्रासौ वेतसी पांथ तत्रेयं सुत
अ० रा सरित्।४६। सरित्तरणमार्गं पृष्टं तं प्रति तं कामयमानाया उत्तरमिदं वेतसीकुंजे स्वार्थं गमि साकूतं प्रश्नोत्तरांतराभिन्नमुत्तरं चित्रमु
५ च्यते। केदारपोषणरताः के खेटाः किं चलं वयः।४७। दाराणां पोषणरताः के इति प्रश्नः। केदारस्य क्षेत्रस्य पोषणरता इति तदेवोत्तरं। के खेटाः खे
चरा इति किं चलं। मातं च प्रश्नस्योत्तरमेकमेव वय इति पक्षिणः यौवनं चेति चित्रं। सूक्ष्मं पराशयाभिज्ञेन रसाकूतचेष्टितं। मयि पश्यति सा
केशैः सीमंतमणिमावृणोत्।४८। विहितं परहृत्तांतं ज्ञातुं साकूतचेष्टितं। प्रियेण हागतेप्रातः कांता तल्पमकल्पयत्।४९। व्याजोक्तिरन्यहेतूक्त्या
यदाकारस्य गोपनं। सखि पश्य गृहारामपरागैरस्मि धूसरा।५०। अत्र चौर्यरतकृतसंकेतभूपृष्ठलुठनलग्नधूलीजालस्य गोपनं। गूढोक्तिरन्योद्दे
श्यं चेद्यदन्यं प्रति कल्प्यते। वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः।५१। यं प्रति किंचिदुक्तं तत्तटस्थे मा विज्ञासीति तदेव तदन्यं कंचिदुद्दिश्य प्रोच्य
ते चेत्सा गूढोक्तिः। हे वृषे सुदाहरणे इह परकलत्रमुपभुंजानं कामुकं प्रति वक्तव्यं परक्षेत्रे सस्यानि भक्षयंतमुक्षाणं कंचित्समीपे चरंतं नि
दिश्य कथ्यते। विवृतोक्तिः श्लिष्टगुप्तं कविनाविःकृतं यदि। वृषापेहि परक्षेत्रादिति वक्ति ससूचनं। युक्तिः परातिसंधानं क्रियया मर्मगुप्तये।
त्वामालिखंती दृष्ट्वान्यं धनुः पौष्पं करे लिखत्।५३। अत्र पुष्पचापलेखनक्रियया मदनो मया लिखित इति स्वमर्मप्रकाशनाय परवंचनं क
तं। लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते। सहस्व कतिचिन्मासान्मीलयित्वा विलोचने।५४। छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थांतरगर्भता।
भुजंग एव जानीते भुजंगचरणं सखे।५५। केनापि कस्यापि वृत्तांतं तत्पृष्टे समीपस्थमन्यं निर्दिश्यायमेव तस्य वृत्तांतं जानातीत्युक्ते वक्तो भुजं
ग एव स्यादिति लोकोक्तिः यथायं धनार्जनादिव्यापारे त्वस्य सहचारी तथा रहस्ये व्यनंगव्यापारे इति मर्मोद्घाटनगर्भिता। वक्रोक्तिः श्लेषकाकु
भ्यामपरार्थकल्पनं। मुंच मानं दिनं प्राप्तं नेह नंदी हरांतिके।५६। मानं मुंच प्रभाता रात्रिरिति स्वाभिप्रायेण दिनं प्राप्तं मामुंचेत्यर्थांतरं श्लेषेण पारिक
ल्पितं। स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं। कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैरुदीक्ष्यते।५७। भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं।
अहं विलोकयेद्यापि युध्यंतेत्र सुरासुराः।५८। स्यान्नभीषणतावनपरमिदं। उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणं। सानौ यस्याभवद्यु
द्धं तद्धूर्जटिकिरीटिनोः।५९। अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनं। अर्थिदातरि राजेंद्रे याचकाः कल्पशाखिनः।६०। निरुक्तिर्योगतो नाम्ना
मन्यार्थस्य प्रकल्पनं। ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्।६१। प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनं। न द्यूतमेतत्कितव क्रीडनं नि
शितैः शरैः।६२। धूर्ते तव प्रगल्भ्यं न युद्धे इत्युपहासो निषेधार्थः। सिद्धस्यैव विधानं यत्तदाहुर्विध्यलंकृतिं। पंचमोद्दंचने काले कोकिलः कोकि
लो भवेत्।६३। कोकिलस्य कोकिलत्वं मधुरतरपंचमध्वनिशालितया सकलजनहृद्यत्वं। हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते। असावुदेति शी
तांशुर्मानच्छेदाय सुभ्रुवो।६४। हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते। लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः।६५। इत्यर्थशतमलंकारा लक्षयि

॥नमो गणपतये। अदुष्टमेतत्सत्कीर्त्यै स्वर्गसोपानपंक्तये। परिहार्यानतो दोषांस्तानेवादौ प्रचक्ष्महे ॥१॥ अनर्थकं श्रुतिकटु व्याहतार्थमलक्षणं। स्वसंकेतप्रक्लृप्ता-
र्थमप्रसिद्धमसंमतं ॥२॥ ग्राम्यं यच्चेवमजायेत पदं तन्न प्रयुज्यते। केचिद्दृष्टाश्च विद्वद्भिरे तेषामप्यदोषता ॥३॥ प्रस्तु तेनुपयुक्तं यत्तदनर्थकमुच्यते। यथा विनाय-
कं वंदे लंबोदरमहं हितु ॥४॥ अत्र हि तु शब्दौ पादपूर्णमात्रत्वादनर्थकौ। लंबोदरमिति विशेषणस्य चार्थदीप्रभावादनर्थकं यत्र तु हपीड्यादा दिश्लि वारं प्रयु-
ज्यते तत्र न दोषः यथा गच्छ गच्छ शुभो मित्रेति सर्वः स पर्यमगोत वेति च। ।निष्ठुराक्षरमत्यंतं बुधैः श्रुतिकटु स्मृतं। एकाग्रमनसा मन्ये स्रष्ट्रेयं निर्मिता य-
था ॥५॥ धात्रेति वक्तव्ये स्रष्ट्रेति श्रुतिकटु। ।व्याहतार्थं यदिष्टार्थबाधकार्थांतराश्रमं। रतस्त्वमेव भूपाल भूतलोपकृतो यथा ॥६॥ भूतलस्योपकृता वुपका-
र इतीष्टार्थस्य बाधकमर्थांतरं भूतानां लोपकृतो लोपकरण इति॥ शब्दशास्त्रविरुद्धं यत्तदलक्षणमुच्यते। मानिनीमानदलनो यथेदुर्विजयत्यसौ ॥७॥ अ-
त्र परस्मैपदमयुक्तं विसर्वस्य जयतेरात्मनियमात्। स्वसंकेतप्रक्लृप्तार्थं नेपार्थांतरवाचकं। यथा विभाति शैलोयं पुष्पितैर्वानरध्वजैः ॥८॥ अत्र वानरध्व-
जशब्देनार्जुनवृक्षः संकेतितो वस्तुतस्तु पांडव लभ्यते। यस्य नास्ति प्रसिद्धिस्तत्स्यादप्रसिद्धं विदुर्यथा। राजेंद्र भवतः कीर्तिश्चातुरो हंति वारिधीन् ॥९॥ हंति गत्यर्थ-
त्वं सिद्धमप्यप्रसिद्धं॥ शास्त्रमपर्यमाख्यातु यन्नसवक्त्रसंमतं। असंमतं तमोभोजं जालयं स्यशावो रवेः ॥१०॥ अंभसो जायत इति पंकप्रतिपादनेशक्तो पयोभोज-
शब्दः कमले रूढत्वादन्यत्रासंमतः। यदन्नानुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा। छादयित्वा सुरान्सुष्ठेः पुरो धान्यं हि पाम्यहं ॥११॥ पुष्पैरभ्यर्च्य वलिंढौकयामी-
ति वक्तव्ये इदं पूर्ववचो ग्राम्यमिति॥ ।पदात्मकत्वाद्वाक्यस्य तद्दोषाः संति तत्र हि। अपदस्यास्तु ये वाक्यदोषास्ता न्भूमहे वयं ॥१२॥ खंडितं व्यस्तसंबंधमसं-
मतमपक्रमं। छंदोरीतियतिभ्रष्टं दुष्टं वाक्यमसत्क्रियं ॥१३॥ वाक्यांतरप्रवेशेन विछिन्नं खंडितं मतं। यथा पातु सदा स्वामी यमिंद्रः स्तौति वाजिनः ॥१४॥ पातु वाजि-
न इति वाक्यं यमिंद्रः स्तौति इति वाक्यांतरेण खंडितं। संबंधि पद दूरत्वे व्यस्तसंबंधमुच्यते। यथाधः संपदं ज्ञाता देयात्त्वा निवो हतां ॥१५॥ अर्हतामाधस्त्वानि-
ज्ञाता जिनो वः संपदं देयादिति दूरान्वयः। शब्दार्थौ यत्र न तुलाविध्यौ तावि वसंमतौ। तदसंमतमित्याहुर्वाक्यं वाक्यविशारदाः ॥१६॥ मानसौकः पतद्धान देवासनविलो-
चनः तमोरिपु विपत्तारिर्धियो दिशतु वो जिनः ॥१७॥ मानसौकाः यः पतत्री हंसः स यानं यस्य देवस्य तस्यासनं कमलं तन्निभनयनो जिनः। तमसोरिपुरर्कस्त-
स्य विपत् राहुस्तदरिर्हरिः श्रियं लक्ष्मीं दिशतु अत्र शब्दा वहवो र्थस्त्वल्पः। अपक्रमं भवेद्यत्र प्रसिद्धक्रमलंघनं। यथा भक्त्या कृतस्नानो गुरून्देवांश्च वंदतां ॥१८॥ स्ना-
त्वा देवानर्चयित्वा गुरून्नत्वा भुंजीं चरेदिति क्रमोल्लंघितः ॥ छंदश्शास्त्रविरुद्धं यच्छंदोभ्रष्टं हि तद्यथा। सजयतात् जिनपतिः परवृजिनमहानिधिः ॥१९॥ अ-
नुष्टुभि प्रथमार्णल्लिंगणकरणात्स्यु दोश्रष्टता। वक्रेनाद्यान्न सौख्यातो मिति तान्निषेधात्। रीतिभ्रष्टमनिर्वाह्यो यत्र रीतेर्भवेद्यथा। जिनो जयति सच्छ्री मानिंद्र-
१२। यमरवंदितः। असमासा वैदर्भी भयः समासा पांचाली रीतिः। पदैर्विरति प्रोक्तं यतिभ्रष्टं बुधैर्यथा। नमस्तस्मै जिनस्वामिने सदा नेमये हते ॥२१॥
अत्र नेइत्यस्यांतिमपादसंधावधाविभ्रंशः। सत्क्रियापदहीनं यत्तदसत्क्रियमुच्यते। यथा … पुष्पैः श्री खंडे घुसृणैः स्तवैः ॥२२॥ पुष्पैरर्चयामि श्री-

[illegible]

खंडे घुसृणैर्विलिंपामि स्तवैः स्तोमीत्यादिक्रियाणां मभावादसत्क्रियत्वं। अथ वाक्यार्थदोषः। देशकालागमावस्थाद्रव्यादिषु विरोधिनः। वाक्ये स्यर्थान्नवध्नीयाद्

दिव्योषधं कारणं विना। १९ प्रवेशे चैत्रस्य स्फुटकुटजराजीस्मितदिशि प्रचंडे मार्त्तंडे हिमकणसम[illegible]मानो ममहसि। जलक्रीडायातं मकरसरसि व लहपकु

लंमदेनांधं विध्यंत्यसममशरपातैः प्रशमिनः। २० अत्र कालद्रव्यदेशावस्थागमविरोधाः क्रमाद्दुन्नेयाः। इति दोषविषानपेकैरकलंकितमुज्ज्वलं सदा विबु

धैः। कविहृदयसागरोत्थितममृतमिवास्वाद्यते काव्यं। २१ अदोषावपि शब्दार्थौ प्रशस्येते न यैर्विना। तानिदानीं यथाशक्ति ब्रूमो [illegible]केयगुणान्। १ औदा

र्यं समता कांतिरर्थव्यक्तिः प्रसन्नता। समाधिः श्लेष ओजोथ माधुर्यं सुकुमारता। २ पदानामर्थचारुत्वप्रत्यायकपदांतरैः। मिलितानां यदाधानं तदौदार्यं

स्मृतं यथा। ३ गंधेभविभ्राजितधाम लक्ष्मीलीलाबुजछत्रमपास्य राज्यं। क्रीडागिरौ रैवतके तपांसि श्रीनेमिनाथोत्र चिरं चकार। ४ बंधस्य यद्वैषम्यं स

मता सोच्यते बुधैः। यदुज्ज्वलत्वं तस्यैव सा कांतिरुदिता यथा। ५ कुचकलशविस्तारिस्फारलावण्यधारामनुवदति यदंगासंगिनी हारवल्लिः। अ[illegible]सदृशम

हिमानं तामनन्योपमेयां कथय कथमहं ते चेतसि व्यंजयामि। ६ फलैः [illegible]प्राहारः प्रथममपि निर्गत्य सदनाद्दनास्यरुः सौख्ये क्वचिदपि पुराजन्मनि कृती।

तपस्यन्नश्रांतं ननु वनभुवि श्रीफलफलैरखंडैः खंडैर्दोश्चिरमकृतपादार्चनमसौ। ७ यदनेयत्वमर्थस्य सार्थव्यक्तिः स्मृता यथा। त्वत्सैन्यरजसा तु प्रेसूर्ये

रात्रिरभूद्दिवा। ८ रूढिस्यार्थपिकत्वं यत्प्रसत्तिः सा च्यते यथा। कसदृमइवामातिवां छितार्थप्रदो जिनः। ९ स समाधिर्यदान्यस्य गुणोन्य[illegible]त्र निवेश्यते।

यथाभुभिरिरिस्त्रीणां राज्ञः पुलूवितं यशः। १० पल्लवितत्वं हत्तगुणोयशसि निवेशितः। [illegible]यत्र पदानि स्युः स्यूतानीव परस्परं। ओजः समाससभूयस्त्वंत

द्येयथा विस्फुरः। ११ मुदायस्याजीतं सहसह चरीभिर्वनचरैर्मुहुः भुक्त्वा हेलोद्धृतधरणिभारं भुजवलं। दरोद्भिद्दर्भांकुरनिकरदंभात्पुलकिताश्चमत्का

रोद्रेकं कुलशिखरिणोद्यापि दधिरे। १२ समराजिरस्फुरदरिनरेशकरिनिकरशिरः सरससिंदूरपूरपरिचये नेवाकलितकरतलो देव इति। सरसार्थपद

त्वं यत्तन्माधुर्यमुदाहृतं। अनिष्ठरोचरत्वं यत्सौकुमार्यमिदं यथा। १३ फणमणिकिरणालीस्यूतचंचन्निचोलः कुचकलशनिधानस्यैव रत्नाधिकारी। उर

सि विशदहारस्फारता मुज्झिहानः किमिति करसरोजे कुंडली कुंडलिन्याः। १४ प्रतापदीपो जनराजिरेव देवत्वदीयः करवाल एष। नो चेदनेनाद्विषतां मु

खानि दपामायमानानि कथं कृतानि। १५ गुणैरमीभिः परितो निबद्धं मुक्ताफलानामिव दाम रम्यं। देवी सरस्वत्यपि कंठपीठे करोत्यलंकारतया कवित्वं।

१६ इति काव्ये गुणदोषाः॥ ॥चित्रं वक्रोक्त्यनुप्रासो यमकं ध्वन्यलंक्रिया:॥ ।यत्रांगसंधितद्रूपैरक्षरैर्वस्तुकल्पना। सत्यां प्रसत्तौ सा चित्रं तच्चित्रं

चित्रकृच्चयत। १ यत्राक्षरैरेव कर्णिकाकेसरदलादिकल्पनया कमलछत्रचामरकलशमुशलादिकल्पना भवति तच्चित्रं तथाकारगतिस्वरव्यंजनभे-

दाच्चतुर्विधं। प्रथमं कमलछत्रादि। द्वितीयं गोमूत्रिकागजतुरगादि। स्वरेण स्वराभ्यां स्वरैर्वा स्वरचित्रं तृतीयं। अत्रैवमात्राच्युतकविंदुच्युतकाद्यंतर्भवति।

स्वरत्वया दृष्टेन चित्रं एकद्वित्रिचतुर्व्यंजनैर्वंधनं व्यंजनचित्रं तुर्यं। वर्णच्युतकमप्य[illegible]स्यैव भेदः। चतुर्वर्णोत्तरं न चित्रं। निरोष्ठ्यादिकमप्यत्रैवांतर्भवति प्रस्तुत

त्ता अंतरालेइतरपदहीना द्वितीया असंयुता इतरपदव्यवहिता तद्यादिगोचर मध्यगोचर म[illegible]गोचरमादिमध्यगोचरंमध्यांतगोचरं आद्यंतगोचरं सर्वगोचरमित्येवं नानाविधं

[illegible]